CAMBRIDGE INTERNATIONAL EXAMINATIONS
**General Certificate of Education Advanced Level**

# SANSKRIT 9606/1

PAPER 1. Prescribed Texts

**MAY/ JUNE 2011**

Additional materials:
Answer paper

**TIME** $2^1/_2$ hours

## INSTRUCTIONS TO CANDIDATES

Write your name, Centre number and candidate number in the spaces provided on the separate answer paper.

Answer all questions.

Write your answers on the answer paper provided.

If you use more than one sheet of paper, fasten the sheets together.

## INFORMATION FOR CANDIDATES

The maximum number of marks for each question is shown in brackets [ ] at the end of each question.

**This question paper consists of 9 printed pages.**


© UCLES 2011

**1** *Buddhacarita of Aśvaghoṣa*

(i) स्थूलोदरः श्वासचलच्छरीरः स्रस्तांसबाहुः कृशपाण्डुगात्रः ।
अम्बेति वाचं करुणं ब्रुवाणः परं समाश्रित्य नरः क एषः ॥

ततोऽब्रवीत्सारथिरस्य सौम्य धातुप्रकोपप्रभवः प्रवृद्धः ।
रोगाभिधानः सुमहाननर्थः शक्तोऽपि येनैष कृतोऽस्वतन्त्रः ॥

इत्यूचिवान् राजसुतः स भूयस्तं सानुकम्पो नरमीक्षमाणः ।
अस्यैव जातो पृथगेष दोषः सामान्यतो रोगभयं प्रजानाम् ॥

ततो बभाषे स रथप्रणेता कुमार साधारण एष दोषः ।
एवं हि रोगैः परिपीड्यमानो रुजातुरो हर्षमुपैति लोकः ॥

इति श्रुतार्थः स विषणचेताः प्रावेपताम्बूर्मिगतः शशीव ।
इदं च वाक्यं करुणायमानः प्रोवाच किंचिन्मृदुना स्वरेण ॥

इदं च रोगव्यसनं प्रजानां पश्यंश्च विश्रम्भमुपैति लोकः ।
विस्तीर्णमज्ञानमहो नराणां हसन्ति ये रोगभयैरमुक्ताः ॥

निवर्त्यतां सूत बहिःप्रयाणान्नरेन्द्रसद्मैव रथः प्रयातु ।
श्रुत्वा च मे रोगभयं रतिभ्यः प्रत्याहतं संकुचतीव चेतः ॥

*Book 3, vv 41 to 47*

**(a)** Translate lines 1 and 2, *'sthūlodaraḥ . . . ka eṣaḥ'.* [4]

**(b)** Explain the simile in line 9. [2]

**(c)** Translate and explain the following:
**(i)** *'rogabhayam'* (line 6)
**(ii)** *'bahiḥprayāṇāt'* (line 13) [2]

**(d)** Explain the significance this outing had for the young Buddha. [2]

**(ii)** ततो मारबलं जित्वा धैर्येण च शमेन च।
परमार्थं विजिज्ञासुः स दध्यौ ध्यानकोविदः॥

सर्वेषु ध्यानविधिषु प्राप्य चैश्वर्यमुत्तमम्।
सस्मार प्रथमे यामे पूर्वजन्मपरंपराम्॥

अमुत्राहमयं नाम च्युतस्तस्मादिहागतः।
इति जन्मसहस्राणि सस्मारानुभवन्निव॥

स्मृत्वा जन्म च मृत्युं च तासु तासूपपत्तिषु।
ततः सत्त्वेषु कारुण्यं चकार करुणात्मकः॥

कृत्वेह स्वजनोत्सर्गं पुनरन्यत्र च क्रियाः।
अत्राणः खलु लोकोऽयं परिभ्रमति चक्रवत्॥

*Book 14, vv 1 to 5*

**(a)** Translate lines 5 to 8, *'amutrāham ayaṃ . . . karuṇātmakaḥ'.* [4]

**(b)** Translate and comment on the following:
**(i)** *'mārabalam'* (line 1)
**(ii)** *'svajanotsargam'* (line 9) [3]

**(c)** State the outcome of the vision of Buddha described here, and give in outline the teaching he formulated. [3]

[Total: 10 x 2 = 20 marks]

**[Turn over**

**2** *Manu*

(i) अध्यापनमध्ययनं यजनं याजनं तथा।
दानं प्रतिग्रहं चैव ब्राह्मणानामकल्पयत्॥
प्रजानां रक्षणं दानमिज्याध्ययनमेव च।
विषयेष्वप्रसक्तिश्च क्षत्रियस्य समासतः॥
पशूनां रक्षणं दानमिज्याध्ययनमेव च।
वणिक्पथं कुसीदं च वैश्यस्य कृषिमेव च॥
एकमेव तु शूद्रस्य प्रभुः कर्म समादिशत्।
एतेषामेव वर्णानां शुश्रूषामनसूयया॥
एवं यः सर्वभूतेषु पश्यत्यात्मानमात्मना।
स सर्वसमतामेत्य ब्रह्माभ्येति परं पदम्॥

*Book 1, vv 88 to 91; Book 12, v 125*

**(a)** Translate lines 1 to 4, *'adhyāpanam . . . samāsataḥ'.* [4]

**(b)** Translate and describe the following compounds:
**(i)** *'sarvabhūteṣu'* (line 9)
**(ii)** *'sarvasamatām'* (line 10) [3]

**(c)** Contrast the adherance to a strict social structure as detailed in the first four of the above verses with the state of the person described in the final verse of this selection. [3]

**(ii)** धर्मं शनैः संचिनुयाद्वल्मीकमिव पुत्तिकाः ।
परलोकसहायार्थं सर्वभूतान्यपीडयन् ॥
नामुत्र हि सहायार्थं पिता माता च तिष्ठतः ।
न पुत्रदारा न ज्ञातिर्धर्मस्तिष्ठति केवलः ॥
एकः प्रजायते जन्तुरेक एव प्रलीयते ।
एकोऽनुभुङ्क्ते सुकृतमेक एव च दुष्कृतम् ॥
मृतं शरीरमुत्सृज्य काष्ठलोष्ठसमं क्षितौ ।
विमुखा बान्धवा यान्ति धर्मस्तमनुगच्छति ॥
तस्माद्धर्मं सहायार्थं नित्यं संचिनुयाच्छनैः ।
धर्मेण हि सहायेन तमस्तरति दुस्तरम् ॥

*Book 4, vv 238 to 242*

**(a)** Explain the simile in line 1. [2]

**(b)** Translate and explain the following compounds:
**(i)** *'sahāyārtham'* (line 3)
**(ii)** *'putradārāḥ'* (line 4) [3]

**(c)** Translate lines 7 and 8, *'mṛtaṃ . . . anugacchati'.* [3]

**(d)** Give a brief account of the means by which 'dharma' or 'puṇya' is collected in this life according to Manu, and other scriptures that you may know of this tradition. [2]

[Total: 10 x 2 = 20 marks]

**[Turn over**

nare



**3** *Upaniṣads*

**(i)** ॐ ईशा वास्यमिदꣳ सर्वं यत्किञ्च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्॥
कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳ समाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे॥
असुर्या नाम ते लोका अन्धेन तमसाऽऽवृताः।
ताꣳस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः॥
स पर्यगाच्छुक्रमकायमव्रण-
मस्नाविरꣳ शुद्धमपापविद्धम्।
कविर्मनीषी परिभूः स्वयम्भू-
र्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः॥

*Īśā Up. vv 1 to 3, and 8*

**(a)** Translate lines 1 to 4, *'Īśā . . . lipyate nare'.* [4]

**(b)** Translate and explain:
**(i)** *'ātmahanaḥ'* (line 6);
**(ii)** *'akāyam'* (line 7);
**(iii)** *'svayambhūḥ'* (line 9) [6]

**(ii)** अस्तमित आदित्ये याज्ञवल्क्य, चन्द्रमस्यस्तमिते किंज्योतिरेवायं पुरुष इति; अग्निरेवास्य ज्योतिर्भवतीति, अग्निनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति; एवमेवैतद्याज्ञवल्क्य ॥

अस्तमित आदित्ये याज्ञवल्क्य, चन्द्रमस्यस्तमिते, शान्तेऽग्नौ किंज्योतिरेवायं पुरुष इति; वागेवास्य ज्योतिर्भवतीति, वाचैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति; तस्माद्वै सम्राडपि यत्र स्वः पाणिर्न विनिर्ज्ञायते, अथ यत्र वागुच्चरति, उपैव तत्र न्येतीति; एवमेवैतद्याज्ञवल्क्य ॥

अस्तमित आदित्ये याज्ञवल्क्य, चन्द्रमस्यस्तमिते, शान्तेऽग्नौ, शान्तायां वाचि किंज्योतिरेवायं पुरुष इति; आत्मैवास्य ज्योतिर्भवतीति, आत्मनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति ॥

*Bṛhadāraṇyaka Up. 4:3: 4 to 6*

**(a)** Translate lines 4 and 8, *'astamitaḥ . . . evam evaitadyājñavalkya'.* [4]

**(b)** Give an account of this conversation, its participants, and the conclusion reached. [3]

**(c)** There are similarities between these two selections from the *Upaniṣads* and the last verse of the first Manu question (page 4). Notwithstanding this apparent overlap, what would you say is the difference, in function and style, between the *Upaniṣads* and the *Manusmṛti*? [3]

[Total: 10 x 2 = 20 marks]

**[Turn over**

**4** *Bhagavad Gītā and Śaṅkara's Commentary*

**(i)** भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा॥

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्।
जीवभूतां महाबाहो ययेदं धार्यते जगत्॥

एतद्योनीनि भूतानि सर्वाणीत्युपधारय।
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा॥

अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः।
शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते॥

यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते।
सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते॥

यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत॥

*Chap. 7, vv 4 to 6; Chap. 13, vv 31 to 33*

**(a)** Translate lines 1 to 4, *'bhūmirāpo . . . jagat'*. [4]

**(b)** Translate and explain:
- **(i)** *'nirguṇatvāt'* (line 7)
- **(ii)** *'sarvagatam'* (line 9) [3]

**(c)** Explain the two similes, one in each of the two final verses given above. [3]

**(ii)** सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः ।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ॥

सत्त्वमिति। सत्त्वं रजस्तम इत्येवंनामानो गुणा इति पारिभाषिकः शब्दो न रूपादिवत् द्रव्याश्रिताः गुणाः। न च गुणगुणिनोरन्यत्वमत्र विवक्षितम्। तस्मात् गुणा इव नित्यपरतंत्राः क्षेत्रज्ञं प्रति अविद्यात्मकत्वात्क्षेत्रज्ञं निबध्नन्तीव। तमास्पदीकृत्यात्मानं प्रतिलभन्ते इति निबध्नन्तीत्युच्यते। ते च प्रकृतिसंभवा भगवन्मायासंभवा निबध्नन्तीव हे महाबाहो महान्तौ समर्थतरौ आजानुप्रलंबौ बाहू यस्य स महाबाहुः हे महाबाहो देहे शरीरे देहिनं देहवन्तमव्ययं, अव्ययत्वं चोक्तं 'अनादित्वात्' इत्यादिश्लोकेन। ननु देही न लिप्यते इत्युक्तं तत्कथमिह निबध्नन्ति इत्यन्यथोच्यते परिहृतमस्माभिः इवशब्देन निबध्नन्तीवेति॥

*Śaṅkarabhāṣya* on *Bhagavad Gītā,* Chap. 14, v 5

**(a)** Translate lines 4 to 7, *'na ca . . . nibadhnantītyucyate'.* [4]

**(b)** Translate and explain *'bhagavanmāyāsambhavāḥ'* (line 7)? [2]

**(c)** List four techniques used by Śaṅkara in this passage which are typical of his methods of expounding a verse. [4]

[Total: 10 x 2 = 20 marks]

END